॥ वाल्मीकि रामायण॥

२ अयोध्याकाण्ड

अध्याय ७६

तामार्यगणसम्पूर्णां भरतः प्रग्रहां सभाम् ।
ददर्श बुद्धिसम्पन्नः पूर्णचन्द्रां निशाम् इव ॥१॥

आसनानि यथान्यायमार्याणां विशतां तदा ।
अदृश्यत घनापाये पूर्णचन्द्रेव शर्वरी ॥२॥

राज्ञस्तु प्रकृतीः सर्वाः समग्राः प्रेक्ष्य धर्मवित् ।
इदं पुरोहितो वाक्यं भरतं मृदु चाब्रवीत् ॥३॥

तात राजा दशरथः स्वर्गतो धर्ममाचरन् ।
धन धान्यवतीं स्फीतां प्रदाय पृथिवीं तव ॥४॥

रामस्तथा सत्यधृतिः सतां धर्ममनुस्मरन् ।
नाजहात्पितुरादेशं शशी ज्योत्स्नामिवोदितः ॥५॥

पित्रा भ्रात्रा च ते दत्तं राज्यं निहतकण्टकम् ।
तङ्कुङ्क्ष्व मुदितामात्यः क्षिप्रमेवाभिषेचय ॥६॥

उदीच्याश्च प्रतीच्याश्च दाक्षिणात्याश्च केवलाः ।
कोट्यापरान्ताः सामुद्रा रत्नान्यभिहरन्तु ते ॥७॥

तच्छ्रुत्वा भरतो वाक्यं शोकेनाभिपरिप्लुतः ।
जगाम मनसा रामं धर्मज्ञो धर्मकाङ्क्षया ॥८॥

स बाष्पकलया वाचा कलहंसस्वरो युवा ।
विललाप सभामध्ये जगर्हे च पुरोहितम् ॥९॥

चरितब्रह्मचर्यस्य विद्या स्नातस्य धीमतः ।
धर्मे प्रयतमानस्य को राज्यं मद्विधो हरेत् ॥१०॥

कथं दशरथाज्जातो भवेद्राज्यापहारकः ।
राज्यं चाहं च रामस्य धर्मं वक्तुमिहार्हसि ॥११॥

ज्येष्ठः श्रेष्ठश्च धर्मात्मा दिलीपनहुषोपमः ।
लब्धुमर्हति काकुत्स्थो राज्यं दशरथो यथा ॥१२॥

अनार्यजुष्टमस्वर्ग्यं कुर्यां पापमहं यदि ।
इक्ष्वाकूणामहं लोके भवेयं कुलपांसनः ॥१३॥

यद्धि मात्रा कृतं पापं नाहं तदभिरोचये ।
इहस्थो वनदुर्गस्थं नमस्यामि कृताञ्जलिः ॥१४॥

राममेवानुगच्छामि स राजा द्विपदां वरः ।
त्रयाणामपि लोकानां राघवो राज्यमर्हति ॥१५॥

तद्वाक्यं धर्मसंयुक्तं श्रुत्वा सर्वे सभासदः ।
हर्षान्मुमुचुरश्रूणि रामे निहितचेतसः ॥१६॥

यदि त्वार्यं न शक्ष्यामि विनिवर्तयितुं वनात् ।
वने तत्रैव वत्स्यामि यथार्यो लक्ष्मणस्तथा ॥१७॥

सर्वोपायं तु वर्तिष्ये विनिवर्तयितुं बलात् ।
समक्षमार्यं मिश्राणां साधूनां गुणवर्तिनाम् ॥१८॥

एवमुक्त्वा तु धर्मात्मा भरतो भ्रातृवत्सलः ।
समीपस्थमुवाचेदं सुमन्त्रं मन्त्रकोविदम् ॥१९॥

तूर्णमुत्थाय गच्छ त्वं सुमन्त्र मम शासनात् ।
यात्रामाज्ञापय क्षिप्रं बलं चैव समानय ॥२०॥

एवमुक्तः सुमन्त्रस्तु भरतेन महात्मना ।
प्रहृष्टः सोऽदिशत्सर्वं यथा सन्दिष्टमिष्टवत् ॥२१॥

ताः प्रहृष्टाः प्रकृतयो बलाध्यक्षा बलस्य च ।
श्रुत्वा यात्रां समाज्ञप्तां राघवस्य निवर्तने ॥२२॥

ततो योधाङ्गनाः सर्वा भर्तॄन्सर्वान्गृहेगृहे ।
यात्रा गमनमाज्ञाय त्वरयन्ति स्म हर्षिताः ॥२३॥

ते हयैर्गोरथैः शीघ्रैः स्यन्दनैश्च मनोजवैः ।
सह योधैर्बलाध्यक्षा बलं सर्वमचोदयन् ॥२४॥

सज्जं तु तद्बलं दृष्ट्वा भरतो गुरुसंनिधौ ।
रथं मे त्वरयस्वेति सुमन्त्रं पार्श्वतोऽब्रवीत् ॥२५॥

भरतस्य तु तस्याज्ञां प्रतिगृह्य प्रहर्षितः ।

रथं गृहीत्वा प्रययौ युक्तं परमवाजिभिः ॥ २६ ॥

स राघवः सत्यधृतिः प्रतापवान्
ब्रुवन्सुयुक्तं दृढसत्यविक्रमः ।
गुरुं महारण्यगतं यशस्विनं
प्रसादयिष्यन्भरतोऽब्रवीत्तदा ॥ २७ ॥

तूण समुत्थाय सुमन्त्र गच्छ
बलस्य योगाय बलप्रधानान् ।
आनेतुमिच्छामि हि तं वनस्थं
प्रसाद्य रामं जगतो हिताय ॥ २८ ॥

स सूतपुत्रो भरतेन सम्यग्
आज्ञापितः सम्परिपूर्णकामः ।
शशास सर्वान्प्रकृतिप्रधानान्
बलस्य मुख्यांश्च सुहृज्जनं च ॥ २९ ॥

ततः समुत्थाय कुले कुले ते
राजन्यवैश्या वृषलाश्च विप्राः ।
अयूयुजन्नुष्ट्ररथान्खरांश् च
नागान्हयांश्चैव कुलप्रसूतान् ॥ ३० ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com